Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# आधाराधेयविचारः



विपिन कुमार
शोधच्छात्रः,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
गुजरात, भारतम्।

**Article Info**
Volume 3, Issue 5
Page Number: 06-13
Publication Issue :
September-October-2020
**Article History**
Accepted : 10 Sep 2020
Published : 23 Sep 2020

**शोध आलेख सार**

संस्कृतभाषा विभक्तिप्रधाना अस्ति, तथा च वाक्यार्थः विभक्त्याधीनं भवति। पाणिनीय व्याकरणे प्रस्तुतेषु बहुषु प्रकरणेषु अन्यतमं प्रकरणं व्याकरणशास्त्रस्य हृदयभूतं चकास्ति कारकप्रकरणम्। इदं कारकम् षड्विधम्। एतेषु कारकेषु अन्तिमं कारकाधिकरणं अधिकरणकारकमिति।

**मुख्यशब्दः** – आधाराधेयविचारः, संस्कृतभाषा, विभक्तिः,पाणिनिः,कारकप्रकरणम्।

---

संस्कृतभाषा विभक्तिप्रधाना अस्ति, तथा च वाक्यार्थः विभक्त्याधीनं भवति। विभक्त्याः विषये उक्तम्–**संख्याकारकबोधयित्री विभक्तिः** अर्थात् यया संख्याकारकयोः बोधः जायते सा विभक्तिः। विभक्तिः यस्य कारकस्य बोधं कारयति तदेव कारकस्य पृथक्–पृथक् रूपेण वर्ण्यते–**क्रियाजनकत्वं कारकत्वम्** यः क्रियां निष्पादयति तदेव कारकम्। एतेषु अन्वयार्थं कारकाणां क्रियासु साक्षादन्वयः आवश्यकमस्ति।अतः उच्यते–**साक्षात् क्रियान्वयित्वं कारकत्वम्**। आचार्यः पाणिनिः कारकस्य कापि स्पष्टा परिभाषा नैव चकार परत्र्च **"कारके"** इत्यनेन कारकपदार्थं दर्शयति।**'कारके'** इत्यारभ्य **'तत्प्रयोजको हेतुश्च'** इति यावत् कारकाणां संख्या षड् सन्ति।तद्यथा–**1.कर्ता 2.कर्म 3. करणम् 4.सम्प्रदानम् 5.अपादानम् 6.अधिकरणम्**

एतानि कारकाणि क्रियाभिः साक्षात्सम्बन्धकारणेन मन्यन्ते। 'सम्बन्ध' इत्यस्य क्रियया साक्षात्सम्बन्धःन भवति। अतः कारकं न मन्यते। एवमेव सम्बोधनमपि कारकं न मन्यते।तद्यथा–

**कर्ता कर्म च करणं च सम्प्रदानं तथैव च ।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्।।**[1]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

वाक्यपदीये कारकम् 'साधनम्'इत्यपि नाम्ना भर्तृहरिः उवाच–

**स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।**

**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।।**[2]

कारकम् 'सुबर्थः' 'विभक्त्यर्थः'च नामयोरपि अभिधीयते।कारकम् विभक्त्यर्थः,विभक्तयः कारकाणि स्पष्टीकरणाय चिह्नानि सन्ति।कारकविभक्त्यौ चान्तरा एवमपि वैभिन्यता भवति यत् कुत्रचित् कारकाणि भिन्नानि भवन्ति,कुत्रचित् विभक्तयः पृथगेव भवन्ति।यथा–कर्तृवाच्ये कर्तरि प्रथमा विभक्तिः,कर्मणि द्वितीया तथा च क्रिया कर्त्रनुसारं भवति।कर्मवाच्ये कर्तरि तृतीया विभक्तिः,कर्मणि प्रथमा विभक्तिः,क्रिया च कर्मानुसारं भवति।एतादृशेषु वैषम्यस्थलेष्वपि सम्यगवबोधनाय कारकज्ञानमावश्यकम्। सहैव वाक्यनिर्मितसाहित्यिकरचनाः कारकज्ञानेन सारल्येनावगन्तुं शक्नुमः।

पाणिनीय व्याकरणे प्रस्तुतेषु बहुषु प्रकरणेषु अन्यतमं प्रकरणं व्याकरणशास्त्रस्य हृदयभूतं चकास्ति कारकप्रकरणम्। इदं कारकम् षड्विधम्। एतेषु कारकेषु अन्तिमं कारकाधिकरणं अधिकरणकारकमिति।

अधिकरणकारकमधिकृत्य स्तोकमिव विषयः उपस्थाप्यते।

**किन्नाम अधिकरणम्?** इति प्रश्नस्य समाधाने भगवता पाणिनिना प्राह **'आधारोऽधिकरणम्'**[3]। सूत्रमिदं अधिकरण कारकस्य लक्षणप्रतिपादकमस्ति।

**यः आधारस्तदधिकरणम्**[4]

**<u>सूत्रविमर्शः</u>–आधारोऽधिकरणम**

पदच्छेदः– आधारः प्रथमैकवचनम्, अधिकरणम् प्रथमैकवचनम्

अनुवृत्तिः –कारके

सूत्रार्थः– कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरणसंज्ञः स्यात्।[5] कर्तृरि विद्यमान क्रियायाः कर्मणि विद्यमान फलस्य वा आधारः अधिकरणसंज्ञको भवतीति फलितार्थः।

अधिकरणसंज्ञा एकेनैव सूत्रेण विहिता। यदा अधिकरणसंज्ञा प्रवृत्ता भवति तदा 'सप्तम्यधिकरणे च' इत्यनेन सूत्रेण अधिकरणे सप्तमी भवतीति। चकारात् दूरान्तिकार्थेभ्यः।

यद्यपि साक्षात् क्रियान्वयित्वं कर्तृकर्मणोरेव तथापि 'क्रियाश्रयोः कर्तृकर्मणोः धारणाद् परम्परया क्रियां प्रति आधारः यत्कारकं तदधिकरणसंज्ञामिति सूत्रार्थः भट्टोजिदीक्षितानामभिमतम्।

नागेशभट्टरीत्या अस्य सूत्रस्य कारकाधिकारे पाठात् क्रियाजनके एव एतत्प्रवृत्या उपस्थिततत्वादेव आधारः क्रियायाः एव गृह्यते।

नागेशभट्टस्तु एतस्य साक्षात्क्रियापरिच्छेदकत्वेन तस्य क्रियाधिकरणत्वसम्भवेपि कर्तृकर्मद्वारैव अधिकरणसंज्ञा भवति, न तु साक्षात् क्रियाधारस्य कालस्येति विशेष्य प्रदर्श्यते,अत्र च तद्रीत्यानुभवो हेतुः।

आधारभेदेऽपि नागेशभट्टस्तु स्वमतं भट्टोजिदीक्षितमतपेक्षया किंचित् पृथक् प्रतिपाद्यते।

भट्टोजिदीक्षितोक्तप्रकारेण आधारस्य त्रैविध्येऽपि नागेशभट्टरीत्या 'सकलत्वाभावः व्याप्तौ यत् व्यापकाधारत्वं तदेवमुख्यधिकरणं बोध्यम्।

**कर्तृनिष्ठक्रियायाः उदाहरणम्–**

बालः कटे उपविशति। उप उपसर्गपूर्वकविश् धातोः अर्थः यत्किंच्चिद्देशसंयोगरूपं फलम्,तदनुकूलक्रिया च। उपवेशनक्रियायाः आश्रयः बालः कर्ता। बाले विद्यमानायाः क्रियायाः आधारः कटः। अतः कटःअधिकरणम्।

**कर्मनिष्ठक्रियायाः उदाहरणम्–**

सूदः ओदनं पचति। पच् धातोः अर्थः विक्लित्तिरूपफलं,तदनुकूलक्रिया च। पाकक्रियाश्रयः सूदः कर्ता। विक्लित्तिरूपफलाश्रयः ओदनः कर्म। अतः स्थाली अधिकरणम्।

**एतच्चाधिकरणं त्रिविधम् भवति।[6]तद्यथा–**

क. अभिव्यापकम्

ख. औपश्लेषिकम्

ग.वैषयिकम्

**अभिव्यापकस्योदाहरणम् अर्थश्च–**

अभि=सर्वात्मा व्याप्नोति इति अभिव्यापकम्। आधेयस्य व्याप्तिः आधारस्य समस्तावयवे चेत् अभिव्यापकमधिकरणम्।

1.दिक्कालाकाशेषु पदार्थाः सन्ति।

2. ईश्वरे सर्वं जगद्वर्तते।

3. तिलेषु तैलम्।

एतेषु उदाहरणेषु सर्वत्र संयोगसमवायमूलकः सकलावयवव्यापिरूपःअभिव्यापकः। यथा–तिलेषु तैलम् अस्ति। अत्र आधारः तिलानि। तिलानां सकलावयवेषु तैलम् अस्ति। सम्बन्धश्च समवायः। अतः अयम् अभिव्यापकःआधारः। एवं सर्वस्मिन् आत्मा अस्ति। दध्नि सर्पिः अस्ति। इत्यादीनि।

**औपश्लेषिकस्योदाहरणम् अर्थश्च–**

त्रिविधोऽत्र विग्रहो व्याख्याकृद्भिः प्रदर्शितः[7]–

क.उपगतः श्लेषः उपश्लेषः=संयोग इति यावत्। अत्र 'उप' इत्यविवक्षितम्।

ख. उप=समीपे श्लेषःसंयोग उपश्लेषस्तत आगतमौपश्लेषिकम्।

ग.श्लेषस्य समीपमुपश्लेषम्,आरोपितश्लेष इत्यर्थः।

1.खट्वायां शेते

2.गृहे निवसति

3.शिशुः कटे शेते

अत्र सर्वत्रोदाहरणेषु एकदेशव्याप्तिरूपः आधारःऔपश्लेषिकः। सः च संयोगमूलकः समवायमूलको वा भवति। अयम् आधारः स्वस्य एकदेशव्याप्तिरूपो भवति,न तु सकलावयवव्याप्तिरूपः। यथा–कटे उपविशति।

अत्र कटः उपवेशनक्रियायाः आधारः। किन्तु उपवेशनक्रिया कटस्य एकदेशे भवति, न तु कृत्स्ने कटे। अत्र सम्बन्धः संयोगः। अतः अयम् औपश्लेषिकःआधारः। 'पाचकः स्थाल्याम् ओदनं पचति' इत्यत्र तु ओदनं कर्म। तन्कर्मनिष्ठक्रियायाः आधारः स्थाली। एषोऽपि औपश्लेषिकः एव।

**वैषयिकोदाहरणम् अर्थश्च–**

विषयो नाम अनन्यभावः,तत्कृतं वैषयिकम्। अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायैतद्भिन्न सम्बन्धेन यदधिकरणं तत् वैषयिकम्।[8]

1.धर्मे प्रतिष्ठते

2.विद्यायां यतते

3.मोक्षे इच्छा अस्ति

विषयतादिसम्बन्धमूलकः आधारः वैषयिकः।

अत्र संयोगः समवायो वा न भवति। अतः औपश्लेषिकाभिव्यापकातिरिक्तःसर्वःअपि आधारः वैषयिकः इति ज्ञेयम्। यथा–पठने इच्छा अस्ति। पठनविषयिणी इच्छा इत्यर्थः। अत्र पठनम् आधारः। सम्बन्धश्च विषयता,न संयोगः समवायो वा।

इदं ज्ञेयम्–पक्षिणः आकाशे डयन्ते। शिष्यः गुरौ वसति। इत्यादीनि वैषयिकस्यैव उदाहरणानि। न हि अत्र संयोगः समवायो वा सम्बन्धः। अतो अत्र संयोगसमवायसम्बन्धौ न भवतः तत्र सर्वत्रापि वैषयिकः आधारः इति निश्चेतव्यम्।

अथ च इदं कारकम् कारकसम्बन्धोद्द्योतानुसारं

**षट् कारकाणिसम्बन्ध उक्तानुक्ततया द्विधा।**[9]

**विभक्तिश्चेति निश्चेयमवश्यं योगमिच्छता।।**

षट् कारकाणि –कर्तृ–कर्म–करण–सम्प्रदानापादानाधिकरणनामानि प्रत्येक–मुक्तानुक्ततया द्विधा अर्थात् द्विप्रकाराणि वर्तन्ते। तथा सम्बन्धोऽपि । तद्यथा–उक्तः कर्त्ता, अनुक्तः कर्त्ता,उक्तं कर्म,अनुक्तं कर्म,उक्तं करणम्,अनुक्तं करणम्,उक्तं सम्प्रदानम्,अनुक्तं सम्प्रदानम्,उक्तमपदानम्,अनुक्तमपदानम्, उक्तमधिकरणम्,अनुक्तमधिकरणम्,उक्तः सम्बन्धः, अनुक्तः सम्बन्धः।

एतासु कारकोक्तानुक्तव्यवस्थासु आधाराधेय सम्बन्धः अधिकरणोऽपि द्विविधः[10]।

**उक्तमधिकरणम्–**

आसनं पीठम्। आस्यते यस्मिन् इति आसनम्। करणाधिकरणयोश्च इत्यनेन अधिरणे युट्। एवं वटकिनी पूर्णमासी। प्रायेण वटका भुज्यन्ते यस्यां पूर्णमास्यां सा वटकिनी पूर्णमासी। अधिकरणे तद्धितो रूढित इतीन्। एवमादिषूक्तत्वादधिकरणे प्रथमा।

**अनुक्तमधिकरणम्–**

आस्ते पीठे। अथवा आस्यते पीठे। आसितं पीठे,गङ्गायां घोषः,तिलेषु तैलम्,दिवि देवाः। एवमादिषु न कश्चिदधिकरणे प्रत्ययो विहित इत्यनुक्तत्वादधिकरणे सप्तमी।

अधिकरणकारके 'कारके'इत्यधिकारे 1.4.45 –1.4.48 पर्यन्तं चत्वारि सूत्राणि वर्तन्ते। विभक्ति प्रकरणे च 2.3.36 तः 2.3. 45 पर्यन्तं यानि सूत्राणि सन्ति तानि अथ च सप्तमीविभक्तसम्बद्धानि सूत्राणि क्रमेण संक्षेपेण च विवेचनं अर्थपुरस्सरं ससूत्रं प्रस्तूयते।

**अधिकरणकारकविधायकानि सूत्राणि –**

**1.सप्तम्यधिकरणे च।** अ. 2.3.36

अनुवृत्तिः–दूरान्तिकार्थेभ्यः, अनभिहिते

सूत्रार्थः–अधिकरणे सप्तमी स्यात्। चकाराद् दूरान्तिकार्थेभ्यः।

उदा.–कटे आस्ते। स्थाल्यां पचति। दूरान्तिकार्थेभ्यः–दूरे ग्रामस्य। विप्रकृष्टे ग्रामस्य। अन्तिके ग्रामस्य।

**2.यस्य च भावेन भावलक्षणम्।** अ. 2.3.37

अनुवृत्तिः–सप्तमी

सूत्रार्थः–यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्या। अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च।

उदा.–गोषु दुह्यमानासु गतः। सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति।

**3.षष्ठी चानादरे।** अ.2.3.38

अनुवृत्तिः–यस्य च भावेन भावलक्षणम्,सप्तमी

सूत्रार्थः–अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः।

उदाहरणानि –रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः।

**4.स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।** अ.2.3.39

अनुवृत्तिः–षष्ठी,सप्तमी

सूत्रार्थः–एतैःसप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठयामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्।

उदा.–गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः।

**5.आयुक्तकुशलाभ्यां चासेवायाम्।** अ.2.3.40

अनुवृत्तिः–षष्ठी,सप्तमी

सूत्रार्थः–आभ्यां योगे षष्ठीसप्तम्यौ स्तः तात्पर्येऽर्थे।

उदा.–आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा।

आयुक्तो गौः शकटे।

**6.यतश्च निर्धारणम्।** अ.2.3.41

अनुवृत्तिः–षष्ठी,सप्तमी

सूत्रार्थः–जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः।

उदा.–नृणां नृषु वा ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्ण बहुक्षीरा। छात्राणां छात्रेषु वा मैत्रः पटुः।

**7.पञ्चमी विभक्ते।** अ.2.3.42

अनुवृत्तिः–यतश्च निर्धारणम्

सूत्रार्थः–विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्।

उदा.–माथुराः पाटलिपुत्रकेभ्यःआढ्यतराः।

**8.साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः।** अ.2.3.43

सूत्रार्थः–आभ्यां योगे सप्तमी स्यादर्चायाम्, न तु प्रतेःयोगे।

उदा.– मातरि साधुर्निपुणो वा। निपुणो राज्ञो भृत्यः।

**9.प्रसितोत्सुकाभ्यां तृतीया च।** अ.2.3.44

अनुवृत्तिः–सप्तमी

सूत्रार्थः– आभ्यां योगे तृतीया स्यात् चात्सप्तमी च।

उदा.–प्रसित उत्सुको वा हरिणा हरौ वा।

**10.नक्षत्रे च लुपि।** अ.2.3.45

अनुवृत्तिः–तृतीया,सप्तमी

सूत्रार्थः–नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे।

उदा.–पुष्येण पायसमश्नीयात्। पुष्ये पायसमश्नीयात्।

**11.सप्तमीपञ्चम्यौ कारकमध्ये।** अ.2.3.7

अनुवृत्तिः–कालाध्वनोः

सूत्रार्थः–शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः।

उदा.– अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता।

**12.अधिरीश्वरे।** अ.1.4.96

अनुवृत्तिः–कर्मप्रवचनीयाः,निपाताः

सूत्रार्थः–स्वस्वामिसम्बन्धे अधिःकर्मप्रवचीयसंज्ञःस्यात्।

उदाहरणम्–अधि देवदत्ते पञ्चालाः,अधि पञ्चालेषु देवदत्तः।

**13.यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी।** अ.2.3.9

अनुवृत्तिः–कर्मप्रवचनीययुक्ते

सूत्रार्थः–अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्।

**14. विभाषा कृञि।**अ.1.4.97

अनुवृत्तिः–अधि, कर्मप्रवचनीयाः,निपाताः

सूत्रार्थः–अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे।

उदा.यदत्र मामाधिकरिष्यति। पक्षे–यदत्र माम् अधि करिष्यति।

एवं प्रकारेण च पञ्चदशभिः सूत्रैः अधिकरणसंज्ञा उक्ता, एवमेव यानि अधिकरणसंज्ञाविधायकानिसम्बद्धानि वार्तिकानि चर्चितानि तानि अत्र प्रस्तूयते–

**वार्तिकानि–**

**1.सप्तमीविधाने क्तस्येन्विषयस्य कर्म्मण्युपसंख्यानम्।** अ.2.3.36

वार्तिकार्थः–यत्र क्तप्रत्ययान्तशब्दैः इन् प्रत्ययो विधीयते,तत्र कर्मकारके सप्तमीविभक्तिः भवति।

उदाहरणम्–असावधीती व्याकरणे। परिगणिती याज्ञिके।

**2.साध्वसाधुप्रयोगे च।** अ.2.3.36

वार्तिकार्थः–साध्वसाधु शब्दयोः प्रयोगे सप्तमी विभक्तिः स्यात्।

उदा.–साधुर्देवदत्तो व्याकरणे, असाधव आर्येषु दस्यवः।

**3.कारकार्हाणां च कारकत्वे।** अ.2.3.36

अर्थः–यत्र कारकाणि स्वकृत्यकर्मं सुचारुतया प्राप्यन्ते तत्रापि सप्तमी विभक्तिः भवेत्।

उदा.–ऋद्धेषु भुञ्जानेषु दरिद्रा आसते।

**4. अकारकार्हाणां चाकारकत्वे।** अ.2.3.36

अर्थः–यत्र कारकाणि स्व अयोग्यता सुचारुतया प्राप्यन्ते तत्रापि सप्तमी विभक्तिः भवेत्।

उदा.–मूर्खेष्वासीनेषु ऋद्धा भुञ्जते।

**5.तद्विपर्य्यासे च।** अ.2.3.36

अर्थः–अकारकार्हाणां कारकार्हाणां च उभयोः योगे सप्तमी विभक्तिः भवति।

उदा.–ऋद्धेष्वासीनेषु मूर्खा भुञ्जते। ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति।

**6.निमित्तात्कर्मसंयोगे।** अ.2.3.36

चर्मणि द्वीपिनं हन्ति,दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति,सीम्नि पुष्कलको हतः।।

हेतौ तृतीयात्र प्राप्ता,तन्निवारणार्थमिदम्। सीमाऽण्डकोशः पुष्कलको गन्धमृगः,योग विशेषे किम्? वेतनेन धान्यं लुनाति। सीम्नि पुष्कलको हतः। इत्यत्र हेतौ तृतीया तादर्थ्ये चतुर्थी च प्राप्ता। तयोः निषेधात् 'निमित्तात्कर्मयोग' इति वार्तिकेन सप्तमी।

**7.अप्रत्यादिभिरिति वक्तव्यम्।** अ.2.3.43

अर्थः–प्रत्यादिभिः योगे सप्तमी न स्यात्।

उदा.–साधुर्देवदत्तो मातरं प्ररि।

## सहायकग्रन्थसूची–

1.परमलघुमञ्जूषा,प्रो.बोधकुमार झा, हंसा प्रकाशनम्,जयपुरम्,2018

2.वाक्यपदीयम् 3.7.1

3.अष्टाध्यायी 1.4.45 वै.सि.कौ.सूत्र–634

4.कातन्त्रव्याकरणम्, 2.4.11

5.वैयाकरणसिद्धान्तकौमुदी–विभक्त्यर्थप्रकरणम्,व्याख्याकार–श्रीधरानन्दः,
मोतीलाल बनारसीदास प्रकाशनम्,अष्टमसंस्करणम्,2017

6.परमलघुमञ्जूषा,प्रो.बोधकुमार झा, हंसा प्रकाशनम्,जयपुरम्,2018
वैयाकरणसिद्धान्तकौमुदी

7.परमलघुमञ्जूषा,प्रो.बोधकुमार झा, हंसा प्रकाशनम्,जयपुरम्,2018

8.परमलघुमञ्जूषा,प्रो.बोधकुमार झा, हंसा प्रकाशनम्,जयपुरम्,2018

9.कारकसम्बन्धोद्द्योतः,हिन्दी विवृत्तिकारः–प्रो.कृष्ण शर्मा,राजस्थानी ग्रन्थागारः,जोधपुरम्,प्रथमं संस्करणम्,2008

10.कारकसम्बन्धोद्द्योतः,हिन्दी विवृत्तिकारः–प्रो.कृष्ण शर्मा,राजस्थानी ग्रन्थागारः,जोधपुरम्,प्रथमं संस्करणम्,2008

## अन्यग्रन्थ–पत्रपत्रिकादिसूची–

1.कारकीये,स्वामी दयानन्द,परोपकारीणि सभा,अजमेर

2.कारकम्,जि.महाबलेश्वरभट्टः,संस्कृतभारती,बेंगलूरु,2010

3.अष्टाध्यायी भाष्य प्रथमावृत्ति,श्री पं.ब्रह्मदत्त जिज्ञासु,रामलाल कपूर ट्रस्ट,हरियाणा,2008

4.संस्कृतविमर्शः,राष्ट्रियसंस्कृतसंस्थानम्, वर्षम् 2019

5.अष्टाध्यायीप्रवेश,रामलाल कपूर ट्रस्ट,हरियाणा,2008